# श्री सोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, अक्तुबर - 2019

| | | |
|---|---|---|
| **कक्षा –** शास्त्री-**1** | **सत्रम् – 1** | **गुणाः - 70** |
| **विषयः –** धर्मशास्त्रम् | **प्रश्नपत्रम् - 7 - CE - 1.1.1** | समयः- 11:**30** तः **2:30** |
| **दिनाङ्कः- 16/10/2019** | **सन्दर्भग्रन्थः –** पाराशरस्मृतिः (1-6 अध्यायाः) | |

**( प्रथमान्वितिः - युनिट-1 )**

**प्र-1 द्वयोः श्लोकयोः सन्दर्भप्रसङ्गपूर्वकं भावार्थे लेख्यः । 10**

1. चतुर्णामपि वर्णानामाचरोधर्मपालकः ।
   आचारभ्रष्टदेहानां भवेद्धर्मः पराङ्मुखः ।।
2. सन्ध्यास्नानं जपोहोमदेवतानां च पूजनम् ।
   आतिथ्यं वैश्वदेवञ्च षट् कर्माणि दिने दिने ।।
3. क्षुधितं तृषितं श्रान्तं बलीवर्दं न योजयेत् ।
   हीनाङ्गां व्याधितं क्लीबं वृषं विप्रो न वाहयेत् ।।

**प्र-2 एकस्य सविस्तरमुत्तरं लिखत । 10**

1. प्रथमाध्यायस्य सारांशो लेख्यः ।
2. ग्रन्थोक्तदिशा साधारणधर्मं निरूपयतु ।

**( द्वितीयान्वितिः - युनिट-2 )**

**प्र-3 द्वयोः ससन्दर्भं व्याख्येयम् । 10**

1. मृते भर्तरि या नारी ब्रह्मचर्ये व्यवस्थिता ।
   सा मृता लभते स्वर्गं यथा सद्ब्रह्मचारिणः ।।
2. यत्पापं ब्रह्महत्यायां द्विगुणं गर्भा पातने ।
   प्रायश्चित्तं न तस्या स्यात्तस्य त्यागो विधीयते ।
3. ऋतुस्नाता तु या नारी भर्तारं नोपसर्पति ।
   सा मृता नरकं याति विधवा च पुनः पुनः ।।

**प्र-4 एकस्योपरि निबन्धं लिखत । 10**

1. अशौचव्यवस्थावर्णनं यथाग्रन्थं निरूपयत ।
2. चतुर्थाध्यायान्तर्गतव्रतविधानानि लिखत ।

**( तृतीयान्वितिः - युनिट-3 )**

**प्र-5 द्वयोः ससन्दर्भं व्याख्यां कुरुत । 10**

1. श्वानचाण्डालदृष्टौ च भोजनं परिवर्जयेत् ।

यदन्नं प्रतिषिद्धंस्यादन्तशुद्धिस्तथैव च ।।

2. चाण्डालं हतवान् कश्चिद् ब्राह्मणो यदि कश्चन ।
प्राजायत्यं चरेद्कृच्छ्रं गोद्वयं दक्षिणां ददेत् ।।

3. स्वयमेव व्रतं कृत्वा ब्राह्मणं योऽवमन्यते ।
वृथा तस्योपवासः स्यान्न स पुण्येन युज्यते ।।

**प्र-6 एकः सविस्तरं लिखत।** **10**

1. षष्ठाध्याये वर्णित भोजनसम्बन्धि आचारविचारं वर्णयत।
2. साम्प्रतसमये पाराशरस्मृतेः आवश्यकता।

**प्र-7 दशानां लघूत्तराणि लिखत।** **10**

1. व्यासः कस्मै धर्मविषयकं प्रश्नं पृच्छति
2. सर्वऋषयः व्यासं पुरस्कृत्य कुत्र गताः
3. त्रेतायां कः परमधर्मः उच्यते
4. कलौ युगे कः परमधर्मः उच्यते
5. कृतयुगः अर्थात् किम्
6. द्रोणस्य किं परिमाणम्
7. पराशरस्मृतौ कति अध्यायाः सन्ति
8. आढकस्य किं परिमाणम्
9. कानि षट् कर्माणि सन्ति
10. क्षत्रियः कति दिनेभ्यः शुद्ध्यति
11. द्वितीयाध्याये कति श्लोकाः सन्ति
12. कलौ का स्मृतिः अनुकरणीया
13. श्वाने दृष्टे सति किं प्रायश्चित्तम्
14. को नाम परिवेत्तः

****************